# Shivakritam 3 Vishnu Stotram

# शिवकृतं ३ विष्णुस्तोत्रम्

## Document Information

Text title : Shivakritam 3 Vishnu Stotram

File name : shivakRRitaM3viShNustotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 199/60-68||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

January 13, 2026

*sanskritdocuments.org*

# शिवकृतं ३ विष्णुस्तोत्रम्

स प्राह मोहिनीं तत्र नारायणमृते क्वचित् ।
योगिनां मनसो धैर्यं हर्तुं शक्तो न वै परः ॥ ६०॥

तस्मै नमो भगवते मायारूपधाराय च ।
नमः कृष्णाय देवाय नारायणाय विष्णवे ॥ ६१॥

मोहिन्यात्मस्वरूपाय मोहरूपाय ते नमः ।
त्वयि नात्र मम शोको नारायणे परात्परे ॥ ६२॥

तथापि देवदेवेश रक्ष मायाविमोहनात् ।
मोहोऽयं जगतां बन्धकरोऽस्ति वासनोदयः ॥ ६३॥

तव योगोऽपि मोहात्मा मुक्त्यात्मा निर्गुणो मतः ।
तवेदं रूपमत्यर्हसौन्दर्यभाजनं परम् ॥ ६४॥

न मे चान्यस्य बन्धाय मोक्षमात्रप्रदं हि तत् ।
तस्मात्त्वया कृतं यद्वै तद्वै मे लाभदं परम् ॥ ६५॥

पार्वत्याः सहवासेऽपि स्मृत्वा त्वां मोहिनीं सदा ।
विनिर्बन्धो भविष्यामि लप्स्ये नैर्गुण्यमेव च ॥ ६६॥

श्रुत्वैतच्छम्भुहार्दज्ञो भगवान् कमलापतिः ।
योषिद्रूपं च संहृत्य चतुर्बाहुः क्षणेऽभवत् ॥ ६७॥

प्रहसन्प्राह सर्वात्मा समाश्लिष्य हरं हृदा ।
मद्भक्तो मत्कृतां मायां जितवानसि शङ्कर ॥ ६८॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने १९९-अध्यायान्तर्गतं शिवकृतं विष्णुस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय १९९/६०-६८॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 199/60-68..

Proofread by PSA Easwaran

*Shivakritam 3 Vishnu Stotram*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*